घर से प्राप्त

वात्स्यायनीयम् कामसूत्रम्

नं० ७७५ - घ (अपूर्णम्)

पत्राणि १० (द्वितः ७०)

याकार्थं हेतोर्मित्राणां चोपकारिणां व्यसनेष्वभ्युपपत्तिः। गृहकर्मसु सख्याः पुत्रस्योत्संज
नं दोहदो व्याधिर्मित्रस्य दुःखापनयनमिति च॥ अलंकारैकदेशविक्रयो नायकार्थं तया
शीलितस्य चालंकारभांडोपस्करस्य वा वणिजो विक्रयार्थं दर्शनं। प्रतिगणिकानां सदृशस्य
भांडस्य व्यतिकरेषु प्रतिविशिष्टस्य ग्रहणं। पूर्वोपकाराणामविस्मरणमनुकीर्तनं च प्र
णिधिभिः प्रतिगणिकानां लाभातिशयं श्रावयेत्। तासु नायकसमक्षमात्मनोऽभ्यधिकं ला
भमलब्धमपि वा व्रीडिता नाम वर्णयेत्। पूर्वयोगिनां च लाभातिशयेन पुनः संधाने यत्न
मानानामाविष्कृतैः प्रतिषेधः। तत्स्पर्द्धिनां त्यागयोगिनां निदर्शनमित्यर्थागमोपायाः।
न पुनरेष्यतीति बालयाचितकम्॥ विरक्तं च नित्यमेव चित्तप्रकृतेर्विक्रियातो विंद्यात्।
मुखवर्णाह नितस्वा ऊनमतिरिक्तं वा ददाति। प्रतिलोमैः संबध्यते। व्यपदेशेनान्यत्करोति।

61

उचितमाछिनत्ति प्रतिज्ञातं विस्मरति। अन्यथा वा योजयति। स्वपक्षैः संज्ञया भाषते।
मित्रकार्यमपदिश्यान्यत्र शेते। पूर्वसंसृष्टायाश्च परिजनेन मिथः कथयति। तस्य सारद्रव्या
णि ज्ञागवेशोधादन्यापदेशेन हस्ते कुर्वीत। तानि वास्याः हस्तादुत्तमर्णाः प्रसह्य गृह्णीयात्। वि
वदमानेन सह धर्मस्थेषु व्यवहरेदिति विरक्तप्रतिपत्तिः॥ सक्तं तु पूर्वोपकारिणमप्यल्प
फलं व्यलीकेनानुपालयेत्। असारं तु निःप्रतिपत्तिमुपायतोऽपवाहयेत्। अन्यमवष्ट
भ्यानदनिष्टसेवा निंदिताभ्यासः ओष्ठनिर्भोगः पादेन भूमेरभिघातोऽविज्ञातस्य विष
यस्य संकथा। तद्विज्ञाते स्वविस्मयः कुत्सा च दर्पविघातः अधिकैः सह संवासः अनपेक्ष
णम् वाकेषु छलग्रहणम्। समानदोषाणां निंदा रहसि चावस्थानं॥ रतोपचारेषूद्वेगः॥ मु
खस्यादानं जघनस्य रक्षणं। नखदशनक्षतेभ्यो जुगुप्सा परिष्वंगे भुजमण्या व्यवधानं

स्तथ्यनागोत्राणांश्चांतमुपलम्भचोदना। अशक्तौहासः शक्तावनभिनंदनं॥ सक्तौव्यत्यासः
निद्रापरत्वं च। दिवापिभावमुपलभ्यमहाजनाभिगमनं वाक्येषु छलग्रहणं अनर्मणिहा
सः नर्मणि चान्यमपदिश्य हसति वदति च तस्मिन्कटाक्षेण परिजनस्य प्रेक्षणं ताडनं च आ
हत्य चास्य कथामन्याः कथाः तद्व्यलीकानां व्यसनानां चापरिहार्याणामनुकीर्त्तनं मर्मणां चे
टिकयोपेक्षणं आगते चादर्शनमयाच्ययाचनमन्ते स्वयंमोक्षः श्चेतिपरिग्रहकस्योक्ते दत्त
कस्य॥ भवतश्चात्र श्लोकौ परीक्ष्य गम्यैः संयोगः संयुक्तस्यानुरंजनं। रक्तादर्थस्य चादान
मंते मोक्षश्च वैशिकं १ एवमेतेन कल्पेन स्थिता वेश्या परिग्रहे। नातिसंधीयते गम्यैः
करोत्यर्थांश्च पुष्कलान् २ इति वात्स्यायनीये कामसूत्रे वैशिके षष्ठेऽधिकरणे अर्थागमोपा
याविरक्तालिंगानि विरक्तेषु प्रतिपत्तिर्निःकामनक्रमाः तृतीयोध्यायः ३ आदितएकत्रिं

शाः ३१ वर्त्तमानंनिःपीडितार्थेनुत्सृजंतीश्चर्वेसंसृष्टेन संदध्यात्॥ सचेदवसितार्थो वित्त
वान् सानुरागश्चततः संधेयः॥ अन्यत्रागतस्तर्कयितव्यः स कार्यमुत्साहबुद्धिः। इतः स्वयम
पसृतस्तनोपिस्वयमेवापसृतः। इतस्तत्रश्चनिष्कासितापसृतः। इतः स्वयमपसृतस्तनोनिष्का
सितापसृतः। इतः स्वयमपसृतस्तत्र स्थितः। इतो निष्कासितापसृतस्स्वयमपसृतः। इतो नि
ष्कासितापसृतस्तत्रस्थितः। इतस्तत्रश्चस्वयमेवापसृतो पजयति चेदुभयोर्गुणापेक्षी चल
बुद्धिरसंधेयः। इतस्तत्रश्चनिष्कासितापसृतः स्थिरबुद्धिः सचेदन्यतो बहुलभमानयानि
ष्कासितः स्यात्सरोषतो मम मामर्बोर्दर्पाद्दाद्धास्यतीतिसंधेयः॥ निःसारतयाकदर्यतयावा
त्यक्तोनश्चेपान्। इतः स्वयमपसृतस्तत्तो निःकासितापसृतो यद्यतिरिक्तमादोन्वदयात्त
नःश्चनियासः इतः स्वयमपसृतस्तत्र स्थितउपजयं स्तर्कयितव्यः विशेषार्थी चागतस्तत्र

तोविशेषमपश्यन्नागन्तुकामो मां जित्वासितुकामस्स आगत्य सानुरागत्वाद्धास्यति। तस्मां
वा दोषान्दृष्ट्वा मयि भिन्नचित्तान्गुणानधुना पश्यन्ति। मद्गुणदर्शी भूयिष्ठं दास्यति। बालोवा
नेकत्रदृष्टिरतिसंधानप्रधानो वा हरिद्रारागो वा यत्किंचनकारी वेत्यसंदध्यान्नवा॥ ०
इतो निःकासितस्ततः स्वयमपसृतउपजप्यं स्तर्कयितव्यः अनुरागाद्रागं तु कामः स बहु
दास्यति। मम गुणैर्भावितो योन्यस्यां न रमते। स्वयमेवापसृतः पूर्वमुपायेन वा मया निःका
सितः समांशीलयित्वा वैरं निर्यातयितुकामः धनमभियोगाद्वा मयास्यापहृतमातद्विष्टा
स्य वृत्तीपमादातुकामो निर्विण्णकामो वा मां वा वर्त्तमानाद्वेदयित्वा तत्कुकाम इत्यकल्या
णबुद्धिरसंधेयः अन्यथाबुद्धिः कालेन लंभयितव्यः इतो निःकासितस्तत्रस्थितउपजप्य
त्वेनेन व्याख्यात इति। तेषूपजपत्सु अन्यत्रस्थितामस्वयमुपजपयेत्॥ व्यलीकार्थं निःकासि

तोमयास्मावनस्यत्रगतोपत्ताद्रानेतव्यः रतः प्रवृत्तसंभाषो वा ततो भेदमवाप्स्यति। वर्त्तमान
63 स्यचेदर्थविघातंकरिष्यति।अर्थागमकालोवास्यस्थानवृद्धिरस्यजानालब्धमनेनाधिक
रतांदारैर्विप्रयुक्तःपारतंत्र्याद्वाहृतःपित्राभ्रात्रावाविभक्तधनोवाथनेनवाप्रतिबध्य।
मानेनसंधिंलब्धानापकंधनिनमवाप्स्यामि।विमानितोवाभार्ययानमेवतस्यांविक्रम
यिष्यामि।।अस्यवामित्रंमद्द्वेषिणींसपत्नीकामयतेतमनुनाभेदयिष्यामि।चलचित्तत
पालाघवमेतमापादयिष्यामि।तस्यादीगमर्हदयोमातुर्हैःशीलेननायिकायाःसत्या
प्यनुरागेवशागायाःपूर्वंनिष्कासनंवर्णयेयुःवर्त्तमानेनचाकामायाःसंसर्गोविद्वेषंचत
स्यास्मामभिज्ञानैःपूर्वानुरागैरेनंज्ञापयेयुःअभिज्ञानंचतत्कृतोपकारसंवर्द्धंस्यादि
तिविशीर्णप्रतिसंधानम्।।अपूर्वेपूर्वेसंसृष्टयोःपूर्वसंसृष्टःश्रेयान्।सहिविदितशीलो

दृष्टरागस्य स्वरूप चारो भवतीत्याचार्याः। पूर्वसंसृष्टः सर्वतो निःपीडितार्थेत्यान्न्यात्सर्वमर्थेदो
ऽः खश्च पुनर्विश्वासयितुं अपूर्वः सुखेनानुरज्यत इति वात्स्यायनः। तथा पितृरूपः प्रकृतितो
विशेषः। भवंति चात्र श्लोकाः। अन्यां भेदयितुं गम्यादन्यतो गम्यमेव च। स्थितस्य चोपघातार्थं
पुनः संधानमिष्यते १ बिभेत्यन्यस्य संयोगाद्व्यलीकानि च नेक्षते। अतिसक्तः पुमान्य
त्र भयाद्बहु ददाति च २ असक्तमभिनंदेत सक्ते परिभवेत्तथा। अन्यदूतानुपाते च
यः स्यादतिविशारदः ३ तत्रोपयायिनं पूर्वं नारी कालेन योजयेत्। भवेदाच्छिन्नसंधा
नं न च सक्तं परित्यजेत् ४ सक्तं तु वशिनं नारी संभाष्याप्यन्यतो व्रजेत्। ततश्चार्थमुपादाय
सक्तमेवानुरंजयेत्॥ ५॥ आयतिं प्रसमीक्ष्यादौ लाभं प्रीतिं च पुष्कलाम्। सौहृदं प्रतिसं
दध्याद्विशीर्णं स्त्री विचक्षणा ६ इति वात्स्यायनीये कामसूत्रे वैशिके षष्ठेऽधिकरणे विशी

64

ऽपि प्रतिसंधानं चतुर्थोऽध्यायः ४ आदितो द्वात्रिंशः ३२ गम्यबाहुल्ये च बहुभ्यो नित्यं लभ
मानाया नैकं प्रतिगृह्णीयात्। देशं कालमात्मनो गुणान् सौभाग्यं चान्याभ्यो न्यूनातिरिक्ततां
चावेक्ष्य रजन्यामर्थं स्थापयेत्। गम्ये दूतांश्च प्रयोजयेत्। तत्प्रतिबद्धांश्च स्वयं प्रहिणुयात्।
द्विस्त्रिश्चतुरिति लाभातिशयग्रहणार्थमेकस्यापि गच्छेत्। परिग्रहकल्पं समकलं चाचरेत्। गम्य
यौगपद्ये तु लाभसाम्ये यद्द्रव्यार्थिनी स्यात्तदायिनि विशेषः प्रत्यक्षत्वाचार्याः॥ अप्रत्यादेय
त्वात्सर्वकार्याणां तन्मूलत्वाद्धिरण्यद इति वात्स्यायनः। सुवर्णरजतताम्रकांस्यलोहभां
डोपस्कारास्तरणप्रावरणवासोविशेषगंधद्रव्यकटुकभांडघृततैलधान्यपशुजाती
नां पूर्वपूर्वतो विशेषः। यत्तत्साम्याद्वा द्रव्यसाम्ये मित्रवाक्यादतिपातित्वादायतितो ग
म्यगुणतः प्रीतितश्च विशेषः। रागित्यागिनोस्त्यागिनि विशेषः प्रत्यक्षत्वादाचार्याः। शक्यो हि

रागिणस्त्यागश्चाधातुं लभ्यो हि रक्तस्त्यजति न तु त्यागी निर्वेधादित्यपर इति वात्स्यायनः । त
त्रापि धनवदधनवतोर्धनवति विशेषः त्यागिप्रयोजनकर्त्रोः प्रयोजनकर्त्तरि विशेषः प्र
त्यक्षत्वादित्याचार्याः ॥ प्रयोजनकर्त्ता सकृत्कृत्वा कृतिनमात्मानं मन्यते त्यागी तु नरतीतं ना
पेक्षत इति वात्स्यायनः । तत्राप्यात्ययिके विशेषः । कृतज्ञत्यागिनोस्त्यागिनि विशेषः प्रत्यक्ष
त्वादित्याचार्याः । चिरमाराधितोऽपि त्यागी व्यलीकमेकमुपलभ्य प्रतिगणिकया च मिथ्यादूषितः
श्रममतीतं नापेक्षते । प्रायेण हि तेजस्विन ऋजवो नादृताश्च त्यागिनो भवन्ति । कृतज्ञस्तु
पूर्वश्रमापेक्षी न सहसा विरज्यते परीक्षितशीलत्वाच्च न मिथ्या दूषितः स्यादिति वात्स्या
यनः । तत्राप्यात्ययिकतो विशेषः । मित्रवचनार्थागमयोरर्थागमे विशेषः तत्र कार्यसंदर्श
नेन मित्रमनुनीय श्वोभविता मित्रं तु सकृद्वाक्ये च प्रतिहते कलुषितं स्यादिति वात्स्यायनः

65

तत्राप्यायतितो विशेषः। मित्रवचनार्थागमयोरर्थागमे विशेषः तत्र कार्यसंदर्शनेन।
मित्रमनुनीयम्योमेदिनामित्रं तुसकृद्धाकेच प्रतिहतेकलुषितं स्यादिति वात्स्यायनः
तत्राप्यनिपातितो विशेषः तत्र कार्यसंदर्शनेन मित्रमनुनीयम्योआत्ततेवचनमस्त्विति
ततोतिपातिनमर्थं प्रतिगृह्लीयात्॥ अर्थागमानर्थप्रतीघातयोरर्थागमे विशेषः प्र
त्यक्षरत्वाचार्याः अर्थः परिमितावच्छेदः अनर्थः पुनः सकृत्प्रसृतो न ज्ञायते क्वावतिष्ठत
इति वात्स्यायनः तत्रापि गुरुलाघवकृतो विशेषः एतेन संशयादर्थप्रतीकारे विशेषो।
व्याख्यातः॥ देवकुलतडागारामाणां करणं स्थलीनामग्निचैत्यानां च बंधनम्॥ गोस
हस्राणां पात्रांतरितं च ब्राह्मणेभ्यो दानं देवतानां पूजोपहाराणां प्रवर्तनम् तद्दे
सहिष्णोर्वा धनस्य परिग्रह इत्युत्तमगणिकानां लाभातिशयः॥ सर्वांगिकोऽलं।

कारयोगोगेहस्योदारस्यकरणंमहार्हैर्भांडैःपरिचारकैश्चगृहपरिछदस्योज्वलतेतिर्य
ग्जीवानांलाभातिशयः।नित्यंशुक्लमाछादनमपक्वंधमन्नपानंनित्यंसौगंधिकेनतांबू
लेनयोगःसहिरण्यभागमलंकरणमितिकुंभदासीनांलाभातिशयः।एतेनप्रदेशेनम।
ध्यमाधमानामपिलाभात्सर्वासामपियोजयेदित्याचार्याः॥देशकालविभवसामर्थ्यानु
रागलोकप्रवृत्तिवशादनियतलाभादियमवृत्तिरितिवात्स्यायनः॥गम्यमन्यतोनि
वारयितुकामासक्तमन्यामपहर्तुकामावाऽन्यांवालाभतोवियुयुक्षमाणागम्य
संसर्गादात्मनःस्थानंवृद्धिमायतिमभिगम्यतांचमन्यमानाचानर्थप्रतीकारेवोत्साहा।
प्यनेनकारयितुकामासक्तस्यवान्यस्यव्यलीकार्थिनीपूर्वोपकारमकृतमिवपश्यंतीके
वलप्रीत्यर्थिनीवाकल्याणबुद्धेरल्पमपिलाभंप्रतिगृह्णीयात्।आत्यर्थिनीतुतमाश्रित्य

चानर्थं प्रतिचिकीर्षन्तीं नैव प्रतिगृह्णीयात्। स त्वाम्येनामन्यतः प्रतिसंधास्यामि गमिष्यति दा
रैर्वा योक्ष्यते नाशयिष्यत्यनर्थान् उग्रं कुशमनुत्तराध्यक्षोस्यागमिष्यति स्वामी पिता वास्या न
66 भ्रंशो वाऽस्य भविष्यति चलचित्तश्चेति मन्यमानास्तदात्वेन तस्माल्लाभमिच्छेत्॥ प्रतिज्ञातमी
श्वरेण प्रतिग्रहं लप्स्यामि तिधिकरणस्यान्तं वा प्राप्स्यति। वृत्तिकालोऽस्य वा सन्नो वा हनमस्याग
मिष्यति॥ स्थलपत्रं वास्य सस्यं पत्स्यते कृतमस्मिन्न नश्यति नित्यमविसंवादको वेत्यभि
गच्छेत्॥ परिग्रहकल्पं वाचरेत्॥ भवंति चात्र श्लोकाः॥ लब्धार्थिगतवित्तांश्च राजवल्लभ
निष्ठुरान्। प्रयत्नेनापि तान्नालाभसापदेशमुपक्रमेत् १ अनर्थावर्जने ये चांगमने ऽभ्युद
यस्तथा॥ प्रयत्नेनापि तान्नगत्वा सापदेशमुपक्रमेत् २ प्रसन्नादये प्रयच्छंति स्वल्पेप्य
गणितं वसु। स्थूललक्षान्महोत्साहांस्तानाच्छेत्स्वैरपि व्ययैः ३ इति श्रीवात्स्यायनीये काम

सूत्रे वैशिके षष्ठेऽधिकरणे लाभविशेषाः पंचमोध्यायः ॥५॥ आदितस्त्रयस्त्रिंशः ३३ अर्थानाचा
र्यमाणाननर्था अप्यनुत्पद्यंत्यनुबंधाः संशयाश्च। ते बुद्धिदौर्बल्यादतिरागादत्यभिमानादति
दंभादत्यार्जवादतिविश्वासादतिक्रोधात्प्रमादात्साहसाद्दैवयोगाच्च स्युः। तेषां फलं कृतस्य
व्ययस्य निष्फलत्वमनायतिरागमिष्यतोर्थस्य निवर्त्तनमाप्तस्य निःक्रमणं पारुष्यस्य प्राप्ति
र्गम्यता शरीरस्य प्रघातः केशानां छेदनं पातनमंगवैकल्यापत्तिस्तस्मादादित एव परिजि
हीर्षेत्॥ अर्थपरित्यागो वोपेक्षेत। अर्थो धर्मः काम इत्यर्थत्रिवर्गः। अनर्थोऽधर्मो द्वेष इत्यन
र्थत्रिवर्गः। तेष्वाचर्यमाणेष्वन्यस्यापि निष्पत्तिरनुबंधः। संदिग्धायां फलप्राप्तौ स्याद्वा न वे
ति संशयः। इदं स्यादिदं वेति संकीर्णः। एकस्मिन्क्रियमाणे कार्ये कार्यद्वयस्योत्पत्तिरुभय
तो योगः। समंतादुत्पत्तिः समंततो योग इति तानुदाहरिष्यामः। विचारितरूपोर्थत्रिवर्गः॥ त

द्विपरीतस्त्वानर्थे त्रिवर्गः यस्योत्तमस्याभिगमने प्रत्यक्षतोऽर्थलाभो ग्रहणीयत्वमायतिरागमः
प्रार्थनीयत्वं चान्येषां स्यात्सोऽर्थोऽर्थानुबंधः ॥ लाभमात्रे कस्यचिदन्यस्यागमनमर्थो निरनुबं
67 धः ॥ अन्यार्थपरिग्रहे सक्तादायतिछेदनमात्रस्यार्थस्य निःक्रमणं लोकविद्विष्टस्य वा नी
चस्य वा गमनमायतिघ्नमर्थोऽनर्थानुबंधः । स्वेन व्ययेन शूरस्य महामात्रस्य वा प्रभावतो वा
लुब्धस्यागमनं निःफलमपि व्यसनप्रतीकारार्थं महतश्चार्थघ्नस्य निमित्तस्य प्रशमनमायति
जननं वा सोऽनर्थोऽर्थानुबंधः । तस्यैव कदर्यस्य सुभगाभिमानिनः कृतघ्नस्य वाति सं
धानशीलस्य स्वैरविश्ययैस्तथैवाराधनमंते निःफलं सोऽनर्थो निरनुबंधः । तस्यैव राजवल्ल
भस्य क्रौर्यप्रभावाधिकस्य तथैवाराधनमंते निःफलं निःकासनं च दोषकरमनर्थोऽन
र्थानुबंधः ॥ एवं धर्मकामयोरप्यनुबंधान्योजयेत् । परस्परेण च युक्त्या संकिरेदित्यनुबंधाः ॥

परिक्षितोपि दास्यति न वेत्यर्थसंशयः निष्पीडितार्थमफलमुत्सृजंस्यादर्थमलभमानायाधर्मः
स्यान्न वेति धर्मसंशयः। अभिप्रेतमुपलभ्य परिचारकमन्यं वा क्षुद्रं गत्वा कामस्यान्न वेति
कामसंशयः। प्रभाववान्क्षुद्रोऽनभिगतोऽनर्थं करिष्यति न वेत्यनर्थसंशयः। अत्यंतनिःफलः
सक्तः परित्यक्तः पितृलोकं यायात्तत्राधर्मः स्यान्न वेत्यधर्मसंशयः। रागस्याविविक्त्वायामभि
प्रेतार्थमनुपलभ्य विरागः स्यान्न वेति द्वेषसंशयः इति शुद्धसंशयाः॥ तेषां संकीर्णाः। आगंतो
रविदितशीलस्य वल्लभसंश्रयस्य प्रभविष्णोर्वा समुपस्थितस्याराधनमर्थोऽनर्थ इति संशयः
श्रोत्रियस्य ब्रह्मचारिणो दीक्षितस्य व्रतिनो लिंगिनो वा मां दृष्ट्वा जातरागस्य मुमूर्षोर्मित्रवा
क्यादानृशंस्याद्वा गमनं धर्मोऽधर्म इति संशयः। लोकादेवाकृतप्रत्ययादगुणो गुणवान्वे
त्यनवेक्ष्य गमनं कामद्वेष इति संशयः। संकीर्णेच्छ परस्परेण प्रतिसंकीर्णसंशयाः। यत्र परस्या

भिगमनेऽर्थः सङ्कावसंघर्षतः सनुभयतोर्थः॥ यत्र स्वेतव्ययेन निष्फलम निगमनं सक्का(
ञ्चामर्षितादिजप्रसादानं सउभयतोऽनर्थः। यत्राभिगमने र्थो भविष्यति न वेत्याशंकास क्रो
68 पिसंघर्षाद्दास्यति न वेति सउभयतोर्थसंशयः। यत्राभिगमने व्ययवति स्वर्थो विरुद्धः क्रोधा
दनर्थं करिष्यति न वेति सक्रोधोऽमर्षितो दत्तं प्रसादास्यति न वेति सउभयतोऽनर्थसंशयः
इत्यौद्दालिकोभयतोयोगाः॥ वाभ्रवीयास्तु॥ यत्राभिगमनेऽनभिगमने च समकादर्थः स
उभयतोर्थः॥ यत्राभिगमने निष्फलो व्ययोऽनभिगमने च निःप्रतीकारोऽनर्थः सनु
भयतोऽनर्थः॥ यत्राभिगमने निर्व्यये दास्यति न वेति संशयोऽनभिगमने च सक्रोदास्यति न
वेति सउभयतोर्थसंशयः॥ यत्राभिगमने व्ययति स्वर्थो विरुद्धः प्रभाववान्जास्यते न वे
ति संशयोऽनभिगमने क्रोधादनर्थं करिष्यति न वेति सउभयतोऽनर्थसंशयः॥ एषामेव

व्यतिकरेऽन्यतोऽन्यतरतोऽनर्थः। अन्यतोऽर्थसंशयोऽन्यतरतोऽनर्थसंशयः। इति षट्संकी
र्णा योगाः। तेषु सहायैः सह विमृश्य यतोऽर्थभूयिष्ठोऽसंशयो गुरुरनर्थप्रशमो वा ततः प्रवर्तेत।
एवं धर्मकामावप्यनयैव युक्त्या उदाहरेत। संकिरेच्च परस्परेण व्यतिषंजयेच्चेत्युभयतो यो
गाः॥ संभूय च विटाः परिगृह्णंतो कामसौख्यगोष्ठीपरिग्रहः॥ सा तेषां इतस्ततः संसृज्यमाना
प्रत्येकं संघर्षादर्थं निर्वर्तयेत्॥ सुवसंतकादिषु च योगे ऽस्य मममुं च मनोरथं संपादयिष्यति
तस्या यास्यामिष्यति मे दुहितेति मात्रा वाचयेत तेषां च संघर्षजेऽभिगमने कार्याणि लक्षयेत
एकतोऽर्थः सर्वतोऽर्थः॥ एकतोऽनर्थः सर्वतोऽनर्थः। उभयतोऽनर्थः सर्वतोऽनर्थः। अर्द्धतोऽर्थः
सर्वतोऽर्थः॥ अर्द्धतोऽनर्थः सर्वतोऽनर्थः॥ इति समंततो योगाः। अर्थसंशयमनर्थसंशयं
च स्वयं वा योजयेत्। संकिरेच्च धर्मकामावपीत्यनुबंधार्थोऽनर्थसंशये विचारः॥ कुंभदा

सी परिचारिका कुलटा स्वैरिणी नटी शिल्पकारिका प्रकाशविनष्टा रूपाजीवा ग
णिका चेति वेश्याविशेषाः ॥ सर्वासां चानुरूपेण गम्यसहाया गम्यास्तदुपरंजनमर्था

गमोपाया निःकासनं पुनःसंधानं लाभविशेषा अनुबंधार्थानर्थसंशयवि-
चाराश्चेति वैशिकम् ॥ भवतश्चात्र श्लोकौ रत्यर्थाः पुरुषा येन रत्यर्थाश्चै
व योषितः शास्त्रस्यार्थप्रधानत्वात्तेन योगोत्र योषितां १ संति रागपरा
गपरा नार्यः संति चार्थपरा अपि ॥ प्राक्तत्र वर्णितो रागो वेश्यायोगा
श्च वैशिके ॥२॥ इति श्री वात्स्यायनीये कामसूत्रे वैशिके षष्ठेऽधिक

इति अनुबंधाधीनधर्मसंशयविचारावेश्याविशेषाख्य षष्ठोध्यायः ६
70 आदितश्चतुस्त्रिंशः ॥ ३४॥ समाप्तं चेदं वैशिकं षष्ठमधिकरणं ६ व्याख्या
तं च कामसूत्रं ॥०

नं ७७९ वात्स्यायनीयम् कामसूत्रम्